|| पाक्षिकः संस्कृतप्रभातम्, एकादशी भाद्रपदः शु.११ शुक्रवासरे युगाब्दे ५११६; दक्षिणायण, अंकः ५ वर्षः १ दि. ५ सप्टेम्बरः २०१४ |.........

# संस्कृतप्रभातम्

## संपादकीयम्

छात्रजीवनं चतुर्विधं मन्यते आगमकालः, अध्यनकालः, स्वाध्यायकालः, प्रवचनकालः । चतुर्विधः आश्रमः सन्ति ब्रह्मचर्यः, गृहस्थः, वानप्रस्थः, संन्यासः च । चर्तुषु आश्रमेषु ब्रह्मचर्यः प्रमुखः भवति । अस्माकं जीवनस्य अयमेव निर्माणकालः । यथा क्रियते तथा एव भुज्यते च । अद्यतनियाः छात्रः श्वः नेता भविष्यति । अतएव छात्रजीवनं सफलतायाः कुञ्चिका वर्तते । अध्ययनस्य सर्वथा वरिवर्तन जातं तथापि यावत् छात्रः छात्रा वा महाविद्यालये अध्ययनं करोति, तावत् तस्य कृते ब्रह्मचर्यकालः अस्ति । प्राचीनकाले अध्ययनं समाप्य एव छात्रः ब्रह्मचर्यस्य पालनं कुर्वन्ति स्म किन्तु अधुना तादृशाः कोऽपि नियमो नास्ति। पठनकालेऽपि छात्राणं विवाह कुर्वन्ति । महानगरेषु नगरेषु ग्रामेषु सर्वे छात्राः एकत्र आगच्छन्ति निवसन्ति च । प्रशासनस्य, धर्मस्य कोऽपि बन्धनं नास्ति अतएव बॉयफ्रेण्ड-गर्लफ्रेण्ड इति पाश्चात्य अणुकरण भवति, एतेन ब्रह्मचर्यस्य हानिः भवति । ब्रह्मचर्यस्य पालनम् अशक्यम् अस्ति। श्रीमद् भागवते नारदमुनी वदति **नन्वग्निः प्रमदा नाम घृतकुम्भसमः पुमान् । सुतामपि रहो जह्यादन्यदा यावदर्थकृत** ।। अर्थात् स्त्री अग्नि समाना अस्ति पुरूषः घृतः समानः अस्ति, यदि स्वपुत्री अपि अस्ति तर्हि एकान्तवासः मा तिष्ठन्तु । पञ्चविंवंशति वर्षाणि यावत् कश्चित् अविवाहितः जितेन्द्रयश्च तिष्ठति तदा सः शतायुः निरोगीश्च भवति । केचन जनाः आजीवनं ब्रह्मचर्यस्य व्रतं पालयन्ति । तादृशाः मणुषाः महाबलशालिनो विद्वानश्च भवन्ति । नारदमुनी, सनकादिकुमारान्, हनुमान, महाभारतस्य पितामहः भीष्मः एतादृशाः एव असन् । एतत् बहु कठिनं अस्ति किन्तु अशक्यं नास्ति । कथं शक्यम् अस्ति । कृष्णस्य एकः नाम हृषीकेशः अस्ति । हृषीकेशः अर्थात् इन्द्रियस्य स्वामी । यदि वयं अस्माकं इन्द्रियानि कृष्णस्य सेवायां नियोजयमाः तर्हि कृष्णः तस्य नियंत्रणं करोति । अतएव इन्द्रियः निग्रहः शक्यं भवति ।

## काव्यविनोदः

एरण्डोऽपि तरुस्तावत् मशकोऽपि विहङ्गमः । खद्योतोऽपि किल ज्योतिः वयं न कवयः कथम् ।।



## प्रार्थना

श्री सच्चिदानन्दघनस्वरूपिणे कृष्णाय चानन्तसुखाभिवर्षिणे। विश्वोद्भवस्थाननिरोधहेतवे नुमो वयं भक्तिरसाप्तयेऽनिशम् ।। अनुवाद - हे कृष्ण! भवतः स्वरूपं सच्चिदानन्द अस्ति। भवान अनन्तसुख प्रदायकः भवान् एव विश्वस्य उत्पत्ती,स्थिती आदिनां कारणं भवति। हे भगवन! भक्त्यां वयं नुमः।

## सम्भाषणम्



लतिका - चित्रक ! भोजनार्थम् आगच्छतु ।
चित्रकः - लतिके ! भोजने किं किम् अस्ति?
लतिका - ओदनम् अस्ति, शाकम् अस्ति, मधुरम् अस्ति।
चित्रकः - आम। लतिके ! कृपया अन्नं परिवेषयतु ।
लतिका - चित्रक ! किम् आवश्यकम्?
चित्रकः - किञ्चित शाकम् आवश्यकम् ।
लतिका - चित्रक ! ओदनम् आवश्यकं किम्?
चित्रकः - ओदनं मास्तु। मधुरम् आवश्यकम् ।
लतिका - कृपया स्वीकरोतु । अन्य किम् आवश्यकम् ।
चित्रकः - किमपि मास्तु, पर्याप्तम् । ध्यन्यवादः ।

## चिन्तनीयम्

हनुमता हताऽराम सीता हर्षा समागता । सर्वे
राक्षसाः रोदन्ति हाहाऽराम हता हताः।
अनुवादं - आराम शब्दस्य अर्थः उद्यानं, हनुमान रावणस्य उद्यानं नष्टं करोति अतः सीता हर्षभरिता भवति परन्तु राक्षसाः रोदन्ति हा!!! उद्यानं नष्टः इति ।

# कथा

## भगवान रामचन्द्रस्य करुणा

श्रीरामचन्द्रस्य रावणस्य च युध्दं जातम् । रावणः भयङ्करं युध्दं कृतवान् । तदा श्रीरामः ब्रह्मास्त्रं प्रयुक्तवान् । ब्रह्मास्त्रेण रावणः मृतः । अनन्तरं विभीषणः अतीव रोदनं कृतवान् । मन्दोदरी अपि रोदनं कृतवती।

श्रीरामः विभीषणम् उक्तवान् ''विभीषण ! रोदनं मास्तु । रावणः विरस्वर्ग प्राप्तवान् अस्ति । इदानीं शवसंस्कारस्य समयः । तदर्थं सिध्दतां करोतु'' इति । '' भगवन् ! रावणः पापी, अधार्मिकः, परस्त्रीकामुकः, दुष्टः च । अतः रावणस्य शवसंस्कारं न करोमि । रावणस्य शवस्पर्शम् अपि न करोमि'' इति विभीषण उक्तवान् । ''विभीषण ! मरणान्तानि वैराणि । अर्थात् मरणपर्यन्तम् एव वैरं तिष्ठति। मरणानन्तरं वैरम् अनुचितं धर्मविरूध्दं च । इदानीं रावणः मृतः । तस्य सर्वे पुत्राः अपि मृताः । कुम्भकर्णः अपि मृतः । रावणस्य शवसंस्कारः भवता एव करणीयः । '' इति राम उक्तवान् । विभीषणः उक्तवान् ''भगवन् तथापि रावणः पापी.....'' '' विभीषणः ! मरणान्तीनि वैराणि । अतः मम अपि रावणस्य विषये वैरं नास्ति । रावणः भवतः यथा सहोदरः तथा मम अपि यदि शवसंस्कारं भवान् न करोति तर्हि अहम् एव करोमि'' इति गम्भीरस्वरेण राम उक्तक्तवान् । '' क्षम्यताम् । अहं शवसंस्कारं करोमि । भगवन् ! भवतः करुणा धर्मदृष्टीः च असाधारणी'' इति वदन् विभीषणः श्रीरामं नमस्कृतवान् । करुणासागरः धर्ममूर्तये श्रीरामाय नमः ।



# पदरञ्जनी

### ४ पदरञ्जन्याः उत्तरम्

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| १का | लि | ७दा | स | ■ | १०र | ■ | ■ |
| २न | लि | न | ■ | ९को | वि | १३द | ■ |
| न | ■ | ८व | र्ण | ■ | ■ | १४श | १७क्क |
| म् | ■ | ■ | ■ | ■ | ■ | मु | |
| ■ | ४न | ■ | ■ | ■ | ११शं | ख | ■ |
| ■ | ५र | म | नी | ■ | क | ■ | ■ |
| ■ | ६सिं | ह | ■ | ■ | १२र | १५ज | १८ क |
| ३प्र | ह | र | ण | म् | ■ | १६न | ल |

### पदरञ्जनी ५

| | | | | | |
|---|---|---|---|---|---|
| १ | | ■ | २ | ३ | ४ |
| ५ | | | ■ | ६ | |
| | ■ | ७ | ८ | | ■ |
| ■ | १० | | | ■ | ११ |
| १२ | | | | ■ | |
| १३ | | | ■ | १४ | |

दिगंतसम शब्द —१. शरीरः । २. लघु जीव निद्रां भङ्गा करोति । ५. सर्पस्य शत्रू । ६. बाणः । ७. सूत्रः । १०. कामी, इच्छुकः। १२. कङ्कणम् । १३. सन्ध्या । १४. माला ।

ऊर्ध्व शब्द — १. वनम् । ३.एषः पशुः बहूः मृदुः शुभ्रः चपलः अपि । ४. हस्त ७. गौमातायाः विष्ठा । ८. कन्दरा, छिद्र । । ११. वृक्षशयिका । १२. मेदः, शरीरे तैलं वृध्दि भवति ।

# सुभाषितम्

यत्फलं नास्ति तपसा न योगेन समाधिना ।
तत्फलं लभते सम्यक्कलौ केशवकीर्तनात्।।

अनुवाद— तपस्यन तवस्वीन् योगान् योगीन् च यत् दुर्लभम् अस्ति तत् कलियुगं कृष्णकीर्तनेन लभते । —:—

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ।
हरे राम हरे राम राम हरे हरे ।।

प्रकाशनं मुद्रणं च संकेत- धीरशांत दासः, कनाई कृष्ण दासः,पाक्षिकः संस्कृतप्रभातम्, हरे कृष्ण चौक, ५० गोकुलनगरे कोंढवा - पुणे-४८ अणुपत्रम् संकेत sanskritprabhatam@gmail.com. d16108@gmail.com, भ्र.ध्व.-८८८८८४४६४८/९४२३२३४४३